॥ श्रीरामः शरणम् ॥

प्रतिगुरुवासरं
प्रकाश्यते

आदिशिला

सम्पादकः
डा. कृष्णप्रसादः जि.

साप्ताहिकी आदिशिलापत्रिका



द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥

प्रथमखण्डस्य | श्री विश्वावसु संवत्सर माघ फाल्गुन २०२६ | प्रथमसङ्ख्या

प्राचीनपत्रमञ्जूषा-०१

॥ श्रीशिवः शरणम् ॥

पुण्यपत्तनतः
२६० शनिवार वीथी
माघ सुदि ८ ।१८३२

सानुरागं सवात्सल्यं मूर्ध्न्युपाघ्राय गाढमालिङ्ग्य च कुशलं वार्तयति ।

अयि जीविताभ्यधिक वत्स! समासादितमेतत् कुशलावेदकं भवतः पत्रं कोल्हापुरतः प्रतिनिवृत्तेनेदानीं जनेनानेन । यत्सत्यं निमज्जित एवास्म्येतेन प्रमदमहाम्भोधौ । प्रेष्ठ! पत्रमिदं भवदीयमवगमयन् मयि कृतघ्नताभावं परिस्खलयत्याबद्धधाराण्यश्रूणि । का गतिः? अपि नाम सम्भाव्यते भवता विस्मरिष्यत्ययं जन आत्मनः प्राणानामिति? न खलु प्रेष्ठ! व्यपेतेष्वपि प्राणेष्वेतत् सुघटम् । एते ननु विहरन्ति भवन्तः सुखमेव मामकीने हृदये । अयमहं संलपामि निरन्तरमेव सङ्कल्पोपनतेन भवता च प्रियबन्धुना चात्मीयेन । स्वप्नेऽपि ननु विलोकयामि प्रत्यहं वः सर्वान् । तदलमन्यथा सम्भाव्य । प्रेष्ठ! यत् किल प्रियबान्धवे मदीयं हृदयं तदेतद् व्यक्तीकृतमेव मया वेणीसंहार आदित एव ।

तथापि ननु नैव प्राहायि मया पत्रमेकमपि प्रियबन्धवे भवते वेति स्थाने किलाशङ्कितं भवता । किन्तु वत्स! कियद् वा ग्लपयामि दुर्भाग्योपहतः प्रत्यहमधिकाधिकमेव कष्टप्रायतामुपारूढामात्मनोऽवस्थितिं विनिवेद्य भवतां हृदयानीति तूष्णीमभवम् । दूरे किल ममावस्थावगमजन्य आनन्दः केवलं तु परिताप एवास्मात् सुलभो हृदयस्य । एकतस्तावद् गरीयस्यार्थिकी हानिरपरतो बलवच्छारीरमस्वास्थ्यं, तदन्यतः श्रीमातृदेव्या वार्धकसुलभं व्याधिवैशिष्ट्यं, तदितरतः साहाय्याभावस्तदन्यतश्चाविमृश्यकारिणा श्वशुरेण नवपरिणीतायाः सहधर्मिण्या हरणं कुमारस्य च पूर्वभार्यायां जातस्य परलोकप्रयाणमित्येवंविधै रन्ध्रोपनिपातिभिरनर्थैरनारतमभिहन्यमानः क्षणमप्यनधिगतस्वास्थ्यो निःसारप्रायस्य जीवितस्यास्य वियोगमेव कामयमानः किं वा कुशलमात्मनो निवेदयामि दुर्भागः? पर्याकुलश्चातिभूमिं गतेन व्यसनजातेन कथं वा समुत्सहिष्ये ग्लपयितुं दुःखैकसारेणात्मनो वृत्तेन कुसुमसुकुमाराणि वो हृदयानि? तत एव च वत्स! समालम्बितः कालमेतावन्तमनिच्छतापि तूष्णीम्भावो दुर्दैवविपाकाभिभूतेन तवानेन ज्येष्ठतातेन । तदलमत्र विमनीभावेन । स्मर्यतां नन्वयं भवदेकजीवितो जनो निरन्तरमेव ।

प्राहायि किल मया विविधविपत्प्रतप्तेन वाराणसीवासकामनया पत्रमेकं महामण्डलाध्यक्षाय। किन्तु कुतो वा भागधेयं ममैतावत्? ततश्च नैतदाश्चर्यं यन्न मे मनोरथः साफल्यमारूढ इति। परित्यक्तं पुनरिदानीं मया कोह्लापुरम्। अत्रैव तु कस्याञ्चिदिंग्रेजीपाठशालायां संस्कृताध्यापकत्वमापन्नोऽस्मि। अहो गरीयसी कालगतिः! श्रीमती पुनर्मातृदेवी कोह्लापुरमेवाध्यास्ते। अहं पुनरत्रैकाकी सुहृदः कस्यापि सदने निवसन्नट्टशूल एव भोजनादिकं निर्वर्त्तयन्नस्मि। सर्वथा श्रीशिवः शरणम्। वत्स! अपि नाम झगिति परित्यजेयुर्मां प्राणाः? येन दुःखतोऽस्मात् सांसारिकान्मुच्येय। अथवा 'दुःखसंवेदनायैव मयि चैतन्यमर्पितं' भगवता।

इत्थमपि व्यसनशतसमाकुलेन व्याख्यातं मया कथञ्चिद्वेणीसंहारम्। व्याचिख्यास्तते च वत्सरेऽस्मिन् प्रबन्धत्रितयम्। तदर्थं चापेक्ष्यते 'द्वादशकोषसंग्रहः'। एष च काश्यां लभ्यत इति श्रूयते। यद्येवं तदा सम्यगनुसन्धाय गृहीत्वा च प्रहीयतां यावच्छक्यं सत्वरमेव। प्रतीक्षमाणो ह्येनमस्मि। चेष्टितव्यं किलाजीवितं पुरुषेणेत्यत एव केवलमेतदनुतिष्ठामि।

संस्कृतचन्द्रिकायास्तु विषये प्राप्तं मया प्रियबन्धोः पत्रम्। किन्तु तत्र गरीयान् व्याकुलीभाव इत्यत एव नोत्तरितम्। बलवत् किलात्र प्रतारितोऽस्मि वर्त्तमान एजेन्सीसङ्घेन 'चन्द्रिकां' च 'वादिनीं' च प्रकाशनार्थं गृहीतवता ग्राहकेभ्यश्च मूल्यमशेषमपि गृहीतवताऽन्ततश्च पत्रिकाद्वितयमपि प्रतिबद्धवता। संहितपत्रादिकमपि तदायत्तमेवेति किं वात्र करवाणि? सर्वथेदानीं धर्माधिकरणमेव शरणम्। न खलु नेच्छामि चन्द्रिकां प्रकाशयितुं, नापि वा नावगच्छामि यशःक्षतय एवाप्रकाशनमेतस्या इति ; तथापि तु कालमनुकूलं प्रतीक्षमाणो विषहे तदेतदशेषमपि।

प्रेष्ठ! समवगत्य व्याकुलत्वं व्याधिभिः श्रीमत्या मे मातृनिर्विशेषायाः प्रजावतीदेव्याः परामेव काष्ठां परितापस्यानुप्राप्तोऽस्मि। हा दैव! जीविताभ्यधिकानां मे सुहृदामपि सुखं न सहसे। प्रणिपातय वत्स! विनयादरावनतं जनमेनं कुशलप्रश्नपुरःसरं श्रीमत्याश्चरणसरोजद्वितये। अपि प्रत्यावृत्तं विक्रमपुरतो मे जीवितम्? एतदिदानीं प्रणम्यते सगाढाश्लेषम्।

आयुष्मन्! निवेदय प्रणतिपरम्परां मे पण्डितप्रवराय श्रीअन्नदाचरणतर्कचूडामणिमहोदयाय। कच्चित् स्मरति मामयं महाभागः?

अत्रास्मि कुशली। श्रीमतां तु सर्वाङ्गीणं मङ्गलमनारतमेव जिज्ञासे। प्रचीयतां प्रेमेति शिवम्।

भवदेकप्रेमा

श्रीअप्पाशर्मा

२६० शनिवार वीथी, पूना सिटि।

